# B.A. 2nd Semester (Honours) Examination, 2021
# SANSKRIT
## Paper: 201C-3
## (Poetics and Literary Criticism)
## Course ID : 20911

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*

### Group-A

**1. अधोलिखितेषु प्रश्नेषु कश्चिदेकः समाधेयः।** 10×1=10

क) का नाम अर्थप्रकृतिः? कतिविधा सा? उदाहरणयोगेन प्रत्येकं भेदो व्याख्यायताम्।

ख) को नाम सन्धिः? कतिविधः सः? प्रत्येकं भेद उदाहरणयोगेन व्याख्यायताम्।

ग) का नाम प्रस्तावना? तस्याः भेदा उदाहरणयोगेन व्याख्यायन्ताम्।

**2. संक्षेपेण कस्याप्येकस्य उत्तरं देवनागरीलिपिमाश्रित्य संस्कृतभाषया प्रदेयम्।** 5×1=5

क) 'कौशिकीवृत्तिम्' आश्रित्य टीका लेख्या।

ख) 'विष्कम्भकम्' आश्रित्य टीका लेख्या।

### Group-B

**3. देवनागरीलिपिमाश्रित्य संस्कृतभाषया कस्याप्येकस्य अलङ्कारस्य सोदाहरणं लक्षणं व्याख्यायताम्।** 5×1=5

उत्प्रेक्षा, यमकम्

**4. देवनागरीलिपिमाश्रित्य संस्कृतभाषया कस्याप्येकस्य अलङ्कारं निरूपयत।** 5×1=5

क) क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्।।

ख) क्षीणः क्षीणोऽपि शशी भूयो भूयोऽभिवर्धते सत्यम्।
विरम प्रसीद सुन्दरि! यौवनमनिवर्ति यातं तु।।

**5. देवनागरीलिपिमाश्रित्य संस्कृतभाषया कस्याप्येकस्य युगलस्य अलङ्कारयोर्मध्ये पार्थक्यं प्रदर्शयत।** 5×1=5

क) रूपकम् उत्प्रेक्षा च।

ख) अर्थान्तरन्यासः अतिशयोक्तिश्च।

### Group-C

**6. केषाञ्चन पञ्चानामुत्तराणि लिखत। द्वयोरुत्तरं संस्कृतभाषया देवनागरीलिपिमाश्रित्य प्रदेयम्।** 2×5=10

क) आचार्यविश्वनाथमते कति अवस्थाः? काश्च ताः?

ख) आचार्यविश्वनाथमते काव्यप्रयोजनं किम्?

ग) आचार्यमम्मटमते कानि काव्यकारणानि?

घ) आचार्यमम्मटमते काव्यं कतिविधम्? कानि च तानि?

ङ) आचार्यकुन्तकमतानुसारं काव्यलक्षणं निरूपणीयम्।

च) नाट्यशास्त्रे भरतमुनिना अलङ्काराणां कति भेदाः स्वीकृताः?

छ) ध्वन्यालोकः केन विरचितः? तस्य ग्रन्थस्य एका मुख्या टीका लेख्या।